५५ गितावच्छेदकानवच्छेदकदेशकालावच्छेदेनप्रतियोगिव्याप्यवृत्तित्वोपपत्तेर्मूलेवृक्षेनकपिसंयोगइत्यादिप्रती
स्तो०२ तिवन्मूलेवृक्षेनकपिसंयोगीत्यादिप्रतीतीनां रक्तोनारश्यामइदानीमिहघटेनश्यामत्वमित्यादिप्रतीतिवदिदानी
मयंघटोनश्यामइत्यादिप्रतीतीनांचतत्साधकत्वादितिश्यामोनेत्यादिप्रतीतीनांश्यामान्याभावविषयकत्वे ना०३
भि०२ बाधकंनापिव्यभिचारशंकानचायंवृक्षोनकपिसंयोगीमूलेऽयंघटोनश्यामइदानीमित्यादिप्रतीतिर्ना
मभेदावगाहिनीनांभेदस्याविरोधित्वात्प्रतियोगितावच्छेदकवत्संयोग्यन्याभावोऽप्रामाणिकइतिवाच्यंत

दवच्छेदेनाव्याप्यवृत्तिधर्म्मप्रकारकबुद्धौ तदवच्छेदेन तदभावप्रकारकज्ञानस्यैव हि प्रतिबंधकत्वं नतु
तत्राऽवच्छेदकानंतर्भावेणापि प्रतिबध्यप्रतिबंधकभावं तरंकस्य नेद्रूतरविषयविरोध्यविरहादिस्वा
वच्छेदकविशेषावच्छेद्यत्वमनवगाहमानस्य तादृशज्ञानस्याविरोधित्वात् अन्यथा वृक्षे कपिसंयोगादिप्रकारकज्ञा
नस्य विरोधित्वसंर्भवेन याकपिसंयोगादिप्रतियोगिकात्यंताभावानामपि प्रतियोगिमत्त्वसिद्धिप्रसंगाद
व्याप्यवृत्तित्वासिद्धेर्व्वर्म्मण्यवृत्त्युच्छेद एव प्रसज्येत एतेन धर्म्युपसर्जनत्वयोपस्थितस्य श्यामत्वादेरभा

५७ वाक्यये निराकांक्षत्वपूर्वसंभववृत्तिराकैत्रविशेषणत्वयोऽस्मितस्यान्यत्र स्वातंत्र्येण विशेषणत्वमान्वये नि
ऌअर राकांक्षत्वस्यापूर्वैसंसिद्ध्येत [redacted] स्य था राजकीयपुरुषबोधतात्पर्य्येण पुरुषस्य राजपु
त्ररातिपुरुषोपसार्य्यत्वामित्यादिवाक्यस्यापिप्रामाण्यापत्तेः नचतत्रवृत्त्यैकदेशार्थ्येतस्याराज्ञो
५८ नपुरुषान्वयसाकांक्षत्वाभावात्तिनरोपसर्ज्जनयेत्तिननदत्तुरोधोनोक्तसुत्पत्तिरावश्यकीतिवाच्यं
तत्रैकदेशार्थ्येवद्धिविशेषणत्वान्वयनिराकांक्षत्वनापादकत्वतादशस्यत्नूपसासिद्धेरिहतुविशेष्यवाच

कपर्दस्यैववृत्तिवहिर्भूतत्वेनतदन्वयनिरूपकांहत्तासंयत्नयेभ्युतपत्त्यंतरकल्पनस्यावश्यकत्वात्
अतएवसविशेषणानांवृत्तिर्नवृत्तस्यविशेषणयोगोनेतिकात्यायनवार्त्तिकेविशेषणपदोपा
दानंसाधुसंगच्छते प्रतियोगीपदादन्यपदन्यनकारकादपि वृत्तिशब्दैकदेशस्यसंबंधत्वेन
तेनैव्यक्तेत्रतिकानंत्रपरिशिष्टमपितेनेतिबुद्धिस्थविशेषणार्थकत्वयोस्तात्कथनवार्त्तिकसमा का२
नार्थकत्वयोन्नेयं चैत्रस्यदासनार्य्येसादौवृत्त्यैकदेशार्थ्यदासदौचैत्रसंबंधादेरन्वयोपपत्तये

५१ क्तृत्तियोगिपदादन्यदिति प्रतियोगिपदं नियतत्वापेक्षणीयसंबंधिबोधकपदं तेनपरंपरासंबंधघता

शा २ त्पर्य्यणाख्याकौस्यकमलिनीकुसममित्यादेर्नसाधुत्वं संबंधित्वेप्यनपेक्षणीयत्वात्तप्रकरणा

शि ३ दिनोपात्तो कदाचित्कथंचिदपेक्षणीयत्वात्समवेधिनियमांशमादिसात्र शदैः श्रौतित्तपत्रदसादे

शातनादिक्रियामकत्वेकदेशार्थेत्वनीयांतार्थश्शरस्याध्यात्वादेरन्वयबोधोयपत्तेपेकारकारन्यादिति

वृत्तिश्चसमासस्तुस्वाध्यासादिरितिनात्रव्यारत्वान्नावसरत्वसादिकमपास्तं अन्योन्याभावस्याप्यव्या

प्ववृत्तित्वानभ्युपगमेनश्यामत्वावछिंनाभावविषयकतयानश्यामइत्याकारकप्रतीत्युपपादनाना
मर्हत्व युक्ततमं चैतत् ॥ अत्यंताभावबोधो अनुयोगिवाचकपदोत्तरंसप्तम्यपेक्षायाअनुत्पत्तिसिद्ध
त्वेनायंनश्याम इत्यादेरनुयोगिवाचकपदोत्तरप्रथमासमभिव्याहृतस्यात्यंताभावविषयकबो
धोपधायकतयोपपादनासंभवात् अतएवंन घट इत्यादिघटसंसर्गाभावबोधकतावारणाय
त्वादृशाभ्युपगन्तरेवंद्वरणीयत्वात् नचनेदंमेवत्रस्यत्यादौविनत्वार्थ्यसंबंधादेरभावबोधो वा

६० त्तेऽनुयोगिवाचकपदोत्तरं सप्तम्यन्तयेऽत्र णत्त अभिचारपराहतेयं अनुत्पत्तिरिति वाच्यं नञ्पदेन प्राति
पदिकार्थस्यासंसर्गाभावबोधनेऽनुयोगिवाचकपदोत्तरसप्तमी न नञादिपदैरभावादिबोधोत्पाद
केऽपि न व्यभिचारः इदं तु तत्त्वं समनियतानामभावानामैक्यस्य लाघवप्रमापितत्वेन धर्म्मासं
सर्गाभावादतिरिक्त एव धर्म्मस्यान्योन्याभावः परं त्वनुयोगिताविशेषमहिम्ना प्रतीतिवैलक्षण्यं एवं नि
र्वहतीति तद्विशिष्टविषयक एवान्योन्याभावत्वेन विभागः तादृशानुयोगितापर्य्याप्त्यतिरिक्ते पदार्थ्य

नाथाः सिद्धांत सिद्धलक्षणानाश्रयादि स्वरूपं तन्मते वैलक्षण्यधर्म्मावच्छिन्नाभावे पर्य्यवसानं नचातिरिक्ता
नुयोगिकत्वांशे तदुक्तविशेषं चोपगम्य प्रतियोगिसाकार वैलक्षण्योपपादनमपेक्ष्य धर्म्मावच्छिन्नाभावतोऽतिरि
क्तएव धर्म्मस्योन्याभावः सिध्यनुयुक्ति सिद्ध्यर्थेने देसमनैपसमात्रस्याकिंचित्करत्वादिति वा
च्यं अतिरिक्ताभावोपगमेपि तत्रानुयोगिताविशेषस्यावश्यमुपगंतव्य तथा लाघवानवकाशादि
सति नवीनाः अपमत्र विशेषः प्रतियोगित्वानुयोगित्वनिरूप्यत्वानिरूपकत्वादि वृत्तिनिपा

६१ मकसंबंधानांनाभावप्रतियोगितावच्छेदकसंबंधत्वमितिनियमेतादात्म्यातिरिक्तत्वंवृत्त्यनियामकसं
बंधस्यान्योन्याभावभिन्नत्वंवाभावस्यविशेषणतांतादात्म्यसंबंधस्यान्योन्याभावप्रतियोगितावच्छे
दकत्वावादिभिरवश्यमुपादेयंतदनंगीकारमतेतुननत्रतादृशविशेषणतानिविशेष्याभावसंयोगाभावइ
तिलाघवमितिदिक् ध्वंसप्रागभावयोःप्रतियोगितानकेनचित्संबंधेनधर्मेणावावच्छिद्यते संस
र्गविशेषावच्छेद्यतास्याधकस्यप्रतिवध्यप्रतिबंधकभावान्यथानुपपत्त्यादेःसंसर्गविशेषोहि

टि
द्विरिवृत्तप्रतीतिस्यादेवं हानवकाशाद् इह घटो ध्वस्त इत्यादिप्रतीतेर्यत्र किंचिद्घटध्वंसवति तद्घटध्वं उ१
सवत्तिवाविशिष्टतयाघटप्रतियोगिकध्वंसावगाहित्वेनैवोपपत्तेर्धर्म्मावच्छेद्यतासाधकप्रमा
ता३ णस्याप्यनवकाशात् असत्ताभावादिप्रतियोगितायां हि धर्म्मावच्छेद्यतासाधकमिदं मानं य
दि घटप्रतियोगिकाभावसामान्ये घटो नास्तीति प्रतीतेर्विषयः स्यात्तदा यत्र किंचिद्घटवत्यपि घटो
नास्तीति प्रतीतेः प्रमात्वं प्रसज्येत घटान्तरप्रतियोगिकाभावस्य तत्राबाधात् तस्य च घट

६२ प्रतियोगिकत्वानपायात् न च सकलघटप्रतियोगिकाभावो ऽघटो नास्तीति प्रतीतेर्विषयः सत्तु यत्र किँद्घटाधिक वि॰
रणे बाधितस्तत्र सघटस्य तत्राभावविरहादिति न तादृशप्रतीतिप्रामाण्यापायतिरिति वाच्यं सकलघटप्रति ने॰२
योगिकस्यापि तदधिकरणेऽव्यक्तिभेदे विशिष्टघटाभावाधात्मकस्य ततत्त्वोतेन रैहाए वृत्तित्वविशिष्टघ
टाभावाधात्मकस्य च विशिष्टाभावस्य घटपटोभयं नास्तीत्यादिप्रतीतिसिद्धस्य घटपटोभयाभावा
धात्मकस्य पटादृत दितरोभयं नास्तीत्यादिधाकारकप्रतीतिसिद्धस्य घटपटेतरोभयाभावाद्यात्म

कस्यांनततोनीलघटनीलेतरघटोभयंनास्तीत्यादिप्रतीतिसिद्धस्यनीलघटनीलेतरघटोभयाभावाधा
या२ लकस्यव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावरूपस्य[redacted]यत्तुकिंचिद्घटवत्यप्यबाधात्
एतेनघटत्वन्यूनवृत्तिप्रतियोगिताकोघटत्वव्याप्यप्रतियोगिताकोघटत्वव्यापकप्रतियोगिताकोघ
टत्वसमनियतप्रतियोगिताकोवाभावोघटोनास्तीतिप्रतीतिविषयइत्युक्तावपिननिस्तारः घटा
न्तराभावविशिष्टाभावादेर्दर्शितव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावानामव्याप्तेः

६३ अतोघटत्वाद्यवच्छिन्नप्रतियोगिताकोऽभावोघटोनास्तीत्याद्याकारकप्रतीतिविषयइतिस्वीकरणीयंएवंचघ
टत्वाद्यवच्छिन्नप्रकारताकग्रहत्वावच्छिन्नंप्रतिघटत्वाद्यवच्छिन्नप्रतियोगिताकाभावप्रकारकनिश्चयत्वे
नप्रतिबंधकतायाअवश्यनिर्वाच्यतयाप्रतिबध्यप्रतिबंधकभावनिर्वचनानुरोधेनापिघटत्वादेर्धर्म्मि
ष्यासेनाभावप्रतियोगितावच्छेदकत्वंसिध्यतीतिदिक्नत्रघटादिप्रतियोगिकाभावाप्रकारकनिश्चयत्व न२
प्रतिबंधकतावच्छेदकंशक्यमास्तांतुयन्न किंचिद्घटवत्यपिघटप्रतियोगिकाभावसत्वेनविषयविरोधवे

धुर्यात् अत एव घटादिकमेवोपलभमाना नो घटत्वादिकं पश्यतामप्यविविंचंतो स्पष्टं तद्दर्शनं संक्षे

वघटत्वादयो धर्म्मा अनुपलभ्यमानत्वादप्रयोजनकत्वाच्चेत्यादयः कुतर्काः परास्ताः दर्शनप्रतीतिविष

यत्वव्यवस्थानुरोधेन प्रतिबध्यप्रतिबंधकभावादिनिर्वाचनानुरोधेन च घटत्वादिधर्म्माणामपि सिद्धेरा

वश्यकत्वात् अत एव च जातिगुणक्रियादीनामाश्रयद्रव्यस्वरूपतामंगीकुर्वाणानां शंकरदर्शनाच

नुयायिनां गुणक्रियाजात्यादयो निर्गुणादिषु नैव ते गुणादिमन्तः स्युः आद्ये आघातो द्वितीये त्वनव

९४ स्यात्माश्रयादिदोषोऽसम्बन्धपरम्परानुसन्धानानुबन्धप्रबन्धरचनादिकमप्यपास्तं धर्म्मधर्म्मिनेदाद्वीकारेप्रतीति
विषयस्य स्यायाः प्रतिबंध्यकप्रतिबंध्यकतावादिनिर्वचनेस्य[illegible]चानुपपत्तेरप्रसुत्तरत्वात् यदि हि कुण्ठत्वद्रव्यत
योर्वृदस्यैवैकस्मेव स्वरूपं स्यात् निर्विकल्पकवीशिष्टबोधयोर्विशेषउपलभ्यमानो विलियेत विषयाविशेषा
त् विलीयेत चद्रव्यमित्याकारकाद्दृट विषयकबोधाद्दृट इत्याकारकस्य नाद्विषयकबोधस्य विशेषो विषयविशेषवि
नव रहात् अतवृ्स्यैत्माश्रयादिदोष इति तु मनोराज्यापत्ते आपत्ति विशेषोऽप्यनवस्थादिना दुक्तमावाधेः सचा

यंतर्कः पंचविधः आत्माश्रयान्योन्याश्रयचक्रकानवस्थाप्रमाणबाधितार्थप्रसंगभेदादिति आत्माश्रया

नं२ दकज्ञप्तिन्यायथापर्वतो यदि निर्वह्निः स्यान्निर्धूमः स्यादित्यादि तत्र निर्धूमत्वं बाधितमनिष्टमापाद्यते निर्वह्नि

त्वज्ञानेनाहार्यरूपेण इहतुगुणवत्तिगुणवत्त्वज्ञानेनाहार्येनापितदापादनीयं संभवति किंचिदनिष्टं यदिगु

णवत्तिगुणः स्यात्तदा किं स्यादित्यनिष्टस्योद्भावयितुमशक्यत्वात् तस्मादेवंविधविपर्ययस्यानवस्थाप्रतिघातनमवि

चारितरमणीयमेवेति तस्माद्धं सप्रागभावज्ञानानां प्रतिपक्ष्यादिवो च विरोधितयान न तत्प्रतियोगितापं

६५

धर्मावच्छेद्यतायाः संसर्गविधेयताया वा साधकं किञ्चित्प्रमाणं प्रसरतीति नवीनाः। वस्तुपूर्वोत्तरकालौ संबन्धीभूय ध्वं
सप्रागभावयोः प्रतियोगितावच्छेदकाविति सांप्रदायिकमतं तन्न तदुपादेयं पूर्वोत्तरकालयोः संबन्धविधया तत्प्र
तियोगितावच्छेदकत्वेपि प्रमाणानवतारात्। यद्यपि ध्वंसश्यामे पश्चात्पाकोत्तरं रक्ते घटे इह श्यामो नास्तीति प्रतीतेर्नो
संत्ताभावो विषयः प्रतियोगिमति तदसत्त्वात्। किन्तु ध्वंस एवेति तत्रैव घटे श्यामतादशायां रक्तो नास्तीति प्रतीतेः प्राग
भावो विषयस्तत्तदीयप्रतियोगितायाश्च श्यामत्वरक्तत्वादिकं धर्मविधयावच्छेदकमवश्यमभ्युपेयं। निदिश्य

मरक्तप्रतियोगिकध्वंसप्रागभावादिमत्त्वेन तादृशप्रतीतेर्विषयैत्तिशंक्यं समाधत्ते तु न ष्मासत्तिसन्तानाविश्यैः
स्था २ ~~मरक्तादिध्वंसप्रागभावाधिकरणो~~ मरक्तादिध्वंसप्रागभावाधिकरणो श्यामरक्तादिस्तावता किं न्वे विश्या
मो नास्ति रक्तो नास्तीत्यादिप्रतीतीनां प्रामाण्यप्रसंगात् न श्यामत्वरक्तत्वाद्यवच्छिन्नप्रतियोगिताकध्वंस
प्रागभावविषयकत्वेनैव तादृशप्रतीतेरुपपादनीयाः न च स वैषामेव श्यामरक्तादिप्रतियोगिकध्वं
सप्रागभावानां श्यामत्वारक्तत्वाद्यवच्छिन्नप्रतियोगिताकत्वस्य न वक्तोपगंतव्यतया सन्तानाविश्यामरक्ते

६६ प्रतियोगिकध्वंसप्रागभाववति श्यामे रक्तः दशावच्छिन्ने श्यामो नास्ति रक्तो नास्तीत्यादिप्रतीतीनां प्रामाण्यप्रसं
गो दुर्वार एव तत्र विद्यमानानां श्यामरक्तादिध्वंसप्रागभावानामपि श्यामत्वरक्तत्वाद्यवच्छिन्नप्रतियोगिता
कत्वादित्य किंचित्करणावध्वंसप्रागभावयोर्धर्म्मावच्छिन्नप्रतियोगिताकत्वांगीकारोपीति वाच्यं यतो ध्वं
सप्रागभावयोः श्यामत्वरक्तत्वाद्यवच्छिन्नप्रतियोगिताकत्वं न सदातननमुपपन्ने किंतु तदधिकरणे श्यामो
तिप्रतीतानां नारक्तो नास्तीति यदा यदा प्रामाण्यमुपपन्नेन तन्तत्कालावच्छेदेनाभाव्यवृत्तेव तत्तद्धर्म्मावच्छिन्नप्रतियोगि

ताकत्वं तत्रोपेयपत्ते इति नकापि प्रसंगात्तिप्रसंगाविनिर्मोचीनेसमाधानं तदपिनैवादरणीयं श्यामरक्ता

द्यधिकरणेऽधित्वनैधिकरणकालाद्यवच्छेदेन श्यामत्वरक्तत्वाद्यवच्छिन्नप्रतियोगिताकासंतनाभावानाम भा०२

प्याप्यवृत्तित्वोपगमेन समावेशस्य समाहितप्रायत्वेन तत्र श्यामो नास्तीत्यादिप्रतीतीनां तादृशासंतनाभा रक्तो नास्ती

वविषयकत्वेनैवोपपत्तेर्द्वित्वसभागाभावयोर्धर्मावच्छिन्नप्रतियोगिताकत्वोपगमानुभययो[illegible]गात् न च

तत्तत्कालावच्छेदेन प्रतियोगिमत्ससंततनाभावसंबंधोपगमाद्दोर् एवंममत्वद्वश्यकृतेन ध्वंसेनत्वासीति

६७

त० प्रतीतेरुपपन्नत्वात् एवमित्तिदेवसाधकं ध्वंसादाववच्छिन्नप्रतियोगिताकत्वस्यैनिवार्यंननेदुर्म्मावच्छिन्नप्र

तियोगिताकत्वनदन्नावयो कालविशेषावच्छिन्नयोर्ध्वंसादौ अभ्युपगतयोर्मानावश्यकत्वेनतत्तादृशला

ववानवकाशात् किंचनास्तीतिप्रतीतेर्ध्वंसादिविषयकत्वमकृतकल्पनीयमनुनवविरुद्धंचरक्तोनास्ती

त्याद्याकारकप्रतीतेःकदाचिद्ध्वंसतात्माभावावगाहित्वंकदाचिद्ध्वंसाद्यवगाहित्वमित्यपिसमाधानंमूसाघ

वसमानाकारकप्रतीतीनांसमानविषयकत्वस्यौचित्यावर्जितत्वेनतत्परित्यागस्यसाहसावलादि

मू॰ह॰१ सादिकंबहुतरं[illegible]नीयमस्मान्नहन्तमहाप्रमादितव्यप्रसेतव्यं गुणकर्म्मान्यत्वादिविशिष्टसत्ताना
स्तीत्यादिप्रतीतिसिद्धविशिष्टाभावप्रतियोगितावच्छेदकताविशेष्यांशपर्य्याप्ताविशेषणांगुणक
र्म्मान्यत्वादिकंविशेष्येसत्तात्वादिकंसमवायविशेषणतावृत्तिसमानाधिकरणसंसर्गवृत्तिसा
मानाधिकरण्यसंसर्गेणगुणकर्म्मान्यत्वादेःसत्तात्वाद्यंशेविशेषणान्वयमासमानत्वा[illegible]त्पर्य्या ५२
प्तिरग्रेवक्ष्यतेतत्तद्धर्मावच्छेदकतापर्य्याप्त्यनुयोगितावच्छेदकंचविशेष्यविशेषणांशपर्य्याप्तसत्तास

५८ अवच्छिन्नत्वादिकं किंत्वपर्याप्त्यक्तिर्भविष्यति सेयमवच्छेदकता लघुधर्मे संभवति गुरुधर्मेण मन्यते
इति कंबुग्रीवादिमान्नास्तीत्यादिप्रतीतिसिद्धाभावप्रतियोगितावच्छेदकं घटत्वादिकमेव न तु कंबु
ग्रीवादिमत्वादिकं कंबुग्रीवास्यवयवसंयोगविशेषस्तस्यावच्छेदकत्वं कंबुग्रीवात्वजातावच्छि
न्नमानेकल्पनीयमिति गौरवं तत्र पेवर्यावद्घटत्वगतानवच्छिन्नावच्छेदकता कल्पने लाघवात् ए
मा वं कंबुग्रीवादेरवच्छेदकत्वं साक्षात्पर्यवसानत्वादिना परंपरासंबंधेनावच्छिन्नकल्पनीयं ततो भवती अ

वलाद्यवं समवायात्मकसाध्यासंबंधावच्छिन्नघटत्वनिष्ठावच्छेदकनिष्ठावच्छेदकताकल्प्यते तादृशापेक्षी
द्यवगौरवपोऽर्हीनं गुरुरूपावच्छेदकतासिद्धेः प्रतिबंधकमिति प्रांचः नवीनाः पुनरत्रापितावच्छेदकावच्छिन्नप्रतियो
गितायाः प्रतियोगिसंसर्गविषयानन्तर्भावेभावस्यानुत्पत्तिसिद्धत्वात्तथापि गौरवज्ञानेकंबुग्रीवादिमात्रा
त्वीत्याघाकरकप्रतीत्युदयाद्वसेव गुरुरपि धर्मः प्रतियोगितावच्छेदक इति सिद्धांतयंति अवच्छेद्यानतिरिक्त
उ· वृत्तित्वं [illegible]एप्यवच्छेदकत्वं नच गुरुधर्मसाधारणं सर्वदा[illegible]दिसिद्धं तेन नतिरिक्तवृत्तित्वं नदभाववदवृत्तित्वं

पव्याहटसामान्याभावादेः प्रतियोगितायाऽप्रभाववत्तिपदावद्वृत्तित्वंघटत्वादावच्छेदके ऽप्रव[illegible]गाहते
६१ नेदमवच्छेदकत्वमभाववद्वृत्तित्वादिरूपंपर्वतत्वादिनिष्ठंपर्वतोवह्निमानित्याद्याकारकानमित्यादिः
तत्रपर्वतत्वादौघटाभाववद्वृत्तित्वादिकंप्रकारतयानभासतेतादृशबोधेऽनवच्छिन्नपर्वतत्वादि
भानस्यैवानुभविकत्वात्तथाप्रतेतुपर्वतत्वादिवृत्तिविशेष्यतावच्छेदकतानिरूपितसांसर्गिकावच्छेद
कतावच्छेदककोटौघटाभाववद्वृत्तिपर्वतत्वादिप्रतियोगिकत्वविशिष्टसमवायापर्वतत्वादेः सम

क॰

वाय्वादिः संबंधो भासते इति यावत् अथ द्रव्यगुणकर्म्मान्यत्वविशिष्टसत्तादेर्धर्म्मितावच्छेदकस्य द्रव्यत्वा
दिप्रकारानतिरिक्तवृत्तित्वं नोपपद्यते विशिष्टस्यानतिरिक्तत्वेन द्रव्यत्वाभाववद्वृत्तिगुणादौ वृत्तेमा
नत्वात्तन्न च तदभाववद्वृत्तित्वं तदभाववद्वृत्तिसाधिकरणनाकत्वं द्रव्यगुणकर्म्मान्यत्वविशिष्टस
त्तावृद्दित्यादिप्रतीतिविषयत्वं तदा च द्रव्यगुणकर्म्मान्यत्वविशिष्टसत्ताधिकरणेतोपेयते गुणे च
सा तोपेयत इति द्रव्यत्वाभावाधिकरणगुणवृत्तिसाधिकरणकत्वं विशिष्टसत्तादावबाधि

१० तमितिवाच्यंतथासतिस्पृष्टसत्तावच्छेदेनद्रव्यत्वप्रकारकप्रतीतेरपिप्रामाण्यापत्तेः गुणेप्यहतिर्यग्द्रव्यनिष्ठा
गुणकर्म्मान्यत्वविशिष्टसत्ताधिकरणतासाद्विस्पृष्टसत्तायानिरूपितानवसैवेतिद्रव्यत्वाभाववद्वृत्तिस्वा
धिकरणतात्मकत्वस्यस्पृष्टसत्तायामकाधित्तत्वात् नचतत्स्वाभाववद्वृत्तिस्वावच्छिन्नाधिकरणताकधर्म्मव
त्त्वंविवक्षणीयंदोषइतिवाच्यंसत्तात्वस्यसत्ताधिवृत्त्यधिकरणतानिरूपकतानवच्छेदकत्वेपिगुणकर्मा
न्यत्वविशिष्टसत्तात्वस्यतत्पर्याप्तत्वेनतद्वत्त्वस्यसत्तायामबाधात्तन्नैवातिप्रसंगसावकाशात् मैवंतद

भावपदवृत्तित्वावच्छिन्नाधिकरणताकतद्धर्म्मवत्वं तेन रूपेण तदनतिरिक्तवृत्तित्वं नादृशधर्म्मावच्छिन्नप्रति
योगिकत्वविशिष्टसमवायत्वादिना विशेषणतावच्छेदकतावच्छेदकसंसर्गभानमपपेयते विशिष्टसत्ता
वच्छेदेकद्रव्यत्वंप्रप्रकारकप्रतीतिस्तु द्रव्यत्वाभाववद्वृत्तित्वावच्छिन्नाधिकरणताकविशिष्टसत्तात्वावच्छिन्न
प्रतियोगिकत्वविशिष्टेन समवायत्वेन विशिष्टसत्तायाः संबंधमवलंब्यने इति तस्याः भासमानत्वं सत्तावच्छेद
नद्रव्यत्वप्रकारकप्रतीतिस्तद्रव्यत्वाभाववद्वृत्तित्वावच्छिन्नाधिकरणताकसत्तात्वादिविशिष्टप्रतियोगिक

७१ त्वविशिष्टसमवायत्वेनविशेष्यतावच्छेदकीभूतसत्तायाः संबंधमवगाहत इति तस्याप्रामाण्यं चोपपद्य
ते संसर्गतावच्छेदकीयभ्रमसंग्रहाय्यैव भ्रमत्वस्य विशेषणगर्भतयावश्यकत्वात् संसर्गतावच्छेदकघ
टकतयाभासमानस्य च द्रव्यत्वाभाववद्वृत्तित्वावच्छिन्ननिरूपकताकाधिकरणताकत्वस्याविषयतायां प्रकारतात्व
विरहेपि विशेषणतात्वस्याबाधितत्वान्न हृदित भ्रमत्वनिर्वाह इत्यभिहितप्रायम् द्रव्यत्वादिकं यत्रानवच्छिन्नविशे
ष्यतावच्छेदकतया भासते तत्र प्रकारीभूतविशिष्टसत्ताद्यभाववद्वृत्तिद्रव्यत्वादिप्रतियोगिकत्वेनैवच्छिन्नद्रव्यत्वादि वा०

घटितेनसंबंधभानमुपेयं विषयताभेदस्यावश्यकतयानुगतैकोक्त्यरावश्यकत्वात् अतएवप्रकारप्रतियोगिकाभा
वनिवेशेवैशिष्ट्यासज्यवृत्तिधर्म्मावछिन्नप्रतियोगिकाभावमादायाप्रसंगभयात् प्रकारतावछेदकावछिन्नप्रतियो
गिताकत्वेनावश्यमभावोनिवेशनीयइति यत्रप्रकारतावछेदकमप्रसिद्धंतत्रस्वरूपतोद्रव्यत्वादेःप्रकारतास्थलेतादृशा
भावघटितसंबंधभानसमाधानंदुर्निवचमितिप्रस्तुक्तं प्रकारभेदेनभेदस्यावश्यकतयायत्रप्रकारतावछेदकमप्रसि
द्धंतत्रप्रकारीभूतद्रव्यत्वादिनिष्ठानवछिन्नावच्छेदकनिरूपकप्रतियोगिताकान्योन्याभाववद्वृत्तित्वरूपस्यतत्त्वनति

७२ रिक्तवृत्तित्वस्यसंबंधघटकतयानिवेशनीयत्वेनानुपपत्त्यभावात् अवछिन्नप्रकारतास्थलेतुप्रकारतास्थलेतुप्रकारता
वछेदकावछिन्नप्रतियोगितावछेदकताकान्योन्याभाववदवृत्तित्वंप्रकारतावछेदकावछिन्नप्रतियोगिताकान्योन्योभा
ववदवृत्तित्वं प्रकारतावछेदकावछिन्नप्रतियोगिताकात्यंताभाववदवृत्तित्वंवासंबंधघटकतयाभासतइत्युपगंतव्यमु
भयथापिसामंजस्यात् अथान्योन्याभावघटितताद्दशानतिरिक्तवृत्तित्वस्यनिवेशेप्रतियोगितावछेदकतानिवेशाधिक्या
द्गौरवमतोलाघवादत्यंताभावघटितमेवानतिरिक्तवृत्तित्वंभासतइतिसेत्स्यतिननुकदाचिदप्यन्योन्याभावघटितमन

तिरिक्तवृत्तित्वभाने प्रकारतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वेनाभावोऽवश्यनिवेश्यः अन्यथासंबंधांतरावच्छि
न्नप्रतियोगिताकभावमादायाप्रसंगात् अन्योन्याभावप्रतियोगितात्तुसंबंधविशेषावच्छिन्नतयानविशेषणीया तत्प्र
तियोगितायानानासंबंधत्वावच्छिन्नत्वविरहादित्यन्योन्याभावघटनायांविपरीतलाघवमितिवाच्यं प्रतियोगितायां
संबंधविशेषावच्छिन्नत्वनिवेशनस्यानावश्यकत्वेप्यन्योन्याभावमादायाप्यप्रसंगस्यदुर्वारत्वात् अवच्छेदकतावच्छेदक
संबंधनिवेशनस्याप्यवच्छेदकतावच्छेदकसंबंधनिवेशनमादायसाम्यान्नगौरवसंपादकतेतिचेन्न अत्रोच्यते संयोग

×२ भावस्यापि प्रतियोगितावच्छेदकतावच्छेदकतायां प्रकारतावच्छेदकसंबंधावच्छिन्नत्वनिवेशनस्यावश्यकत्वात् अन्यथासंबंधांतरेप्रकारवतोऽन्यस्या ×२

७३ दीनामव्याप्यवृत्तीनांप्रकारतास्थलेतत्तद्भाववद्वृत्तित्वंविशेष्यतावच्छेदकस्यदुर्लभमित्यप्रसक्तिनिवृत्तयेप्रतियोगिवैयधि
करण्येनात्यन्ताभावोविशेषणीयस्तस्यचप्रतियोग्यनधिकरणवृत्तित्वात्मकस्यसंयोगादव्याप्यवृत्तिप्रतियोगिकाभावे
पिसंयोगाद्यनधिकरणगुणादिवृत्तित्वादव्याधितत्वमित्यप्रसंगतादवस्थ्यात् प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्व
पर्य्यवसितं प्रतियोग्यनधिकरणत्वंवृत्तित्वनिरूपकतयानिविष्टेऽभावाधिकरणेनिवेशनीयमन्यथातादृशान्यत्वविशिष्टसं
योगत्वाद्यवच्छिन्नस्यप्रकारस्यद्रव्यत्वाद्यावतिप्रसक्तिनिर[illegible]र्त्येयोगाद्द्रव्यत्वाद्यवच्छेदेनतादृशविशिष्टसंयोगत्वाद्यवच्छि
न

न्नप्रकारकबोधस्यप्रसंगात् प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वंच प्रतियोगितावच्छेदकतावच्छेदकसंबंधावच्छिन्न
प्रतियोगितावच्छेदकवृत्तित्वनिरूपकतावच्छेदकताकाधिकरणत्वावच्छिन्नप्रतियोगिताकोभेदः नातःकालिकविशेषणता
दिसंबंधेनदर्शितविशिष्टसंयोगत्वाद्यवच्छिन्नस्याधिकरणतायावृक्षादौसत्वेपिदर्शितातिप्रसंगः अन्योन्याभावघटिता
नतिरिक्तवृत्तित्वशरीरेतुप्रतियोगिवैयधिकरण्यंनैवनिवेशनीयमितितद्घटकसंबंधाद्यनिवेशप्रयुक्तंमहदेवलाघ
वं अन्योन्याभावोप्यव्याप्यवृत्तिरितिमते यद्यपियथाश्रुतेसंयोगादिप्रकारानतिरिक्तवृत्तित्वस्यद्रव्यत्वादौविशेष्यतावच्छे

७४ दृके दुर्लभतया ऽप्रसक्तिनिवृत्तये प्रतियोगिवैयधिकरण्यनिवेशस्यावश्यकतास्त्वेव तथापि प्रतियोगित्वावच्छिन्नप्र
तियोगिताकोभेद एव तदधिकरणे निवेशनीय इति लाघवमपरिहार्य्यम् वस्तुतो बाधाभावादिप्रयोजकसमवधाने ऽबा
धितसंबंधभानमबाधितं न तत्र लाघवगौरवविचारः किमपि फलं प्रयोजयति सति प्रयोजकसंकरे लघुनोप्यन्योन्या
भावघटितानतिरिक्तवृत्तित्वस्येव गुरुणोप्यत्यंताभावघटितस्य तस्य भानसंकरस्येष्टत्वात् एवं व्याप्यवृत्तेर्गुरुत्वादेः
प्रकारस्य तादृशसंसर्गकोटिप्रविष्टो ऽभावः प्रयोजनाभावात् प्रतियोगिवैयधिकरण्याद्विनानविशेषणीयो विशेष

णीयोप्यव्याप्यवृत्तित्वभ्रमदशायांवाधात्तद्घटितस्यतदीयतादृशसंवंधस्यभानासंभवात् तथाचप्रयोजकसमवधाना
समवधानाभ्यांतादृशविशेषणघटिताघटितसंवंधानामेकैकसमुदितभानाभानोभयोपपत्तिरव्याहतेतिसारं तत्रघा
भावः प्रकारतावच्छेदकसंवंधावच्छिन्नप्रतियोगिताकत्वेनविशेषणीयः प्रकारतावच्छेदकावच्छिन्नत्वादिनाविशेषिता
यामेवप्रतियोगितायांप्रकारतावच्छेदकसंवंधावच्छिन्नत्वंनिवेशनीयमितिफलितं तेनसंवंधांतरावच्छिन्नप्रतियोगि
ताकप्रकाराभाववतिविशेष्यतावच्छेदकस्यवृत्तावपिनाप्रसंगः नोपादेयमेववाप्रकारतावच्छेदकसंवंधावच्छिन्नत्वंप्र

कारतावच्छेदकसंबंधे नप्रतियोगितावच्छेदकावच्छिन्नसंबंधित्वरूपस्य प्रतियोग्यमधिकरणत्वस्य निवेशनेन संबंधांतराव
च्छिन्नप्रतियोगिताकतद्भावस्यघटकबहिर्भावसंभवात् नचैवं तादृशसंबंधेन प्रकारसंबंधीतरावृत्तित्वमेव सम्यगन्योन्या
भावात्यंभावयोः प्रकारीययोर्निवेशेऽप्रयोजक इति वाच्यं यथासन्निवेशे वैयर्थ्यविरहेण तदुभयघटितसंसर्गभानस्या
पिप्रामाणिकत्वात् नहितादृशाभावघटिततद्घटितधर्मावच्छिन्नप्रतियोगिताकयोरभावयोरैक्यं संभवतीति येन तत्प्रति
योगितावच्छेदकघटकविशेषणवैयर्थ्यं संभाव्येत समनियताभावैक्येपि विशेषणविशेष्यभावविपर्ययाधीनं निवेशं

तरमनिवार्यमितियथासन्निवेशवैयर्थ्यविरहः सुसमाधएव एतेनवृत्त्यनियामकसंबंधस्यप्रतियोगितावछेद
कत्वानभ्युपगममतेस्वामित्वादिसंबंधेनधनादेःप्रकारतास्थलेतादृशविशिष्टसंसर्गप्रसिद्ध्याप्रामाण्यभयेनान्यो
न्याभावघटितमेवातिरिक्तवृत्तित्वमादरणीयं तत्रचनासौदोषोवृत्त्यनियामकसंबंधस्यात्वेनाभावप्रतियोगि
तानवछेदकत्वेप्यन्योन्याभावप्रतियोगितावछेदकतावछेदकत्वस्यावश्यकत्वादन्यथाचैत्रोनपक्केत्यादावव
छेदकतासंबंधावछिन्नपाककृतित्वावछेदकताकप्रतियोगिताकान्योन्याभावबोधनानुपपत्तेः पचत्यपिचै

सा

७६ त्रैनपक्षेत्यादिप्रयोगस्यप्रामाण्यवारणायसमवायेंनत्रप्रतियोगितावच्छेदकतावच्छेदकसंबंधनयाबोधयितुमश
क्यत्वादित्यादिकमप्यपास्तं वृत्त्यनियामकसंबंधस्यात्यंताभावप्रतियोगितानवच्छेदकत्वेपितद्घटितानतिरिक्तवृ
त्तित्वस्याप्रसिद्धावपिभेदघटितस्यैवतस्यवृत्त्यनियामकसंबंधावच्छिन्नप्रकारतास्थलेवश्योपादेयत्वेपिवृत्तिनिया
मकसंबंधावच्छिन्नप्रकारतास्थलेप्यसंतान्योन्याभावघटितनानाविधसंबंधभानोपगमस्यनिरोद्धुमशक्यत्वात्।
किंचवृत्त्यनियामकसंबंधस्यात्यंताभावप्रतियोगितानवच्छेदकत्वेतत्संबंधाभावेनोपपन्नावतिरिक्ताभावकल्पने

गौरवादृकल्पनेलाघववीजं समनियताभावैक्येपिप्रतियोगितावच्छेदकत्वाद्याधिक्यात्वनंत्प्रयुक्तगौरवस्यापरिहार्य्य
त्वादित्येनतत्समानमन्योन्याभावेपितत्रापिधनत्वामित्वाद्यवच्छिन्नप्रतियोगिताकान्योन्याभावेनोपपन्नत्वात्स्वामित्वादिसंबं
धावच्छिन्नधनादिनिष्ठावच्छेदकत्वतन्निरूपकप्रतियोगित्वादिकल्पनेगौरवस्यसाम्यात् यद्दिचचैत्रोनपचतीत्यादा
वनुकूलतायाबोधकपदाभावेनप्रकारविधयाभानासंभवात्तादृशसंबंधेनपाकविशिष्टयाकृतेरभावोबोधनीयः॥
इत्यत्यंताभावप्रतियोगितावच्छेदकत्वेकत्पनियामकसंबंधस्यावश्यकं तथैवचचैत्रोनपक्तेत्यादावनुकूलतासंबंधेन

७७ पाकविशिष्टायाकृतेरवच्छेदकतासंसर्गेणतद्विशिष्टस्यभेदोबोधनीयइत्यन्योन्याभावीयप्रतियोगितावच्छेदकताया
स्तदवच्छेदकताघावच्छेदकत्वंवृत्त्यनियामकसंबंधस्याप्यवश्यमभ्युपेयम् विनिगमकांतरस्यबलवत्त्वेलाघवगौरवयो
रकिंचित्करत्वादित्युच्यते तदानपद्यतेचैत्रइत्यादौपाकविशिष्टायाःकृतेरवच्छेदकतासंबंधावच्छिन्नप्रतियोगिताकस्यै
वाभावस्यचैत्रादौबोधनीयतयात्येनाभावप्रतियोगितावच्छेदकत्वमपिवृत्त्यनियामकसंबंधस्यस्वहस्तस्थितमेवेति
विभावनीयम् अथप्रकारताख्यस्यापिविशेष्यतावच्छेदकस्यकालिकविशेषणतादिसंबंधेनप्रकाराभावस्याधिकरणेव

र्त्तमानस्यत्वात्प्रसंगः नचाभावीयविशेषणतासंबंधेनाभावाधिकरणत्वस्यनिवेशनीयत्तयानदोषइतिवाच्यं घटाभावा
देः प्रकारस्यतादृशसंबंधेनाभावाधिकरणाप्रसिद्धेरप्रसंगादितिचेत्र केचित् अभावाभावत्वेनभावस्यापिवैशेषिकविशे
षणतयाप्रामाणिकंचिंतनीयं एतेनाभावत्वप्रतीतेः प्रामाण्यनिर्वाहायाभावाभावोतिरिक्तएवमन्यतेइतितस्याभावीय
विशेषणतयाधिकरणत्वप्रसिद्धेर्नकाचिदनुपपत्तिरित्यपिप्रत्युक्तं क्लृप्तेनभावेनैवाभावाभावप्रतीत्याद्युपपत्तेरतिरिक्ता
भावसिद्धेरप्रामाणिकत्वात् परेतुप्रकारनिरूपितप्रतियोगितावच्छेदकसंबंधेनप्रकाराभावस्याधिकरणत्वंनिवेशनीयं

७८ तादृशस्वसंबंधोभावस्य प्रकारतास्थलेभावीयविशेषणताश्रभावस्यप्रकारतास्थलेतु तदीयप्रतियोगितावच्छेदकीभूतः संयो
गादिरितिनकाचिदनुपपत्तिरधिकमस्मत्कृतमहाप्रभायामनुसंधेयमितिसमादधति तादृशाभावत्वावच्छिन्ननिरूपकताकत्वे
नाधिकरणत्वंनिवेशनीयं तेनगुणकर्मान्यत्वविशिष्टसत्ताभावादेः प्रकारतास्थलेसत्तानतिरिक्तविशिष्टसत्ताद्यात्मकतादृश
प्रकाराभाववत्त्वस्यगुणादौसत्त्वेपिनगुणत्वादेर्विशेष्यतावच्छेदकस्यतादृशप्रकारानतिरिक्तवृत्तित्वान्निर्वाहः तादृशविशिष्ट
सत्ताभावाभाववत्त्वावच्छिन्ननिरूपकताकाधिकरणतायाद्रव्यएवोपगमात् गुणेतदसत्त्वादितिविशेष्यतावच्छेदकतावच्छे

दकसंबंधावच्छिन्नत्वेनतादृशाधिकरणनिरूपितावृत्तिरभावप्रतियोगितयानिवेशनीया नातःप्रकाराभाववतिसंबंधांतरेणवृ
त्तेर्विशेष्यतावच्छेदकेवृत्तावपिदोषं नन्वेवंसंयोगादिनाद्रव्यादेर्विशेष्यतावच्छेदकस्यसमवायादिनाप्रकारीभूतगुणाद्य
नतिरिक्तवृत्तित्वंनोपपद्यते समवायादिसंबंधावच्छिन्नप्रतियोगिताकगुणाद्यभावाधिकरणगुणादिनिरूपितत्वविशिष्ट
स्यतादृशविशेष्यतावच्छेदकतावच्छेदकसंयोगादिसंबंधावच्छिन्नाधेयत्वस्याप्रसिद्धत्वादितिचेदत्रकेचिद्विशेष्यतावच्छेदकता
तावच्छेदक १ वच्छेदकसंबंधावच्छिन्नाधेयत्वप्रतियोगिकत्वविशिष्टविशेषणतात्वावच्छिन्नसांसर्गिकवच्छेदकताकप्रतियोगिताकप्रकार

७१ भाववद्वृत्तित्वं सामान्याभावोनिवेशनीयः दर्शितस्थलेप्रकाराभाववत्तिसंयोगात्मविशेष्यतावछेदकतावछेदकसंबंधावछि
न्नस्याधेयत्वस्याप्रसिद्धवपितादृशसंबंधावछिन्नाधेयताप्रतियोगिकत्वविशिष्टविशेषणतात्मकव्यधिकरणसंबंधावछिन्न
प्रतियोगिताकस्यतादृशप्रकाराभावाधिकरणनिरूपितवृत्तित्वसामान्याभावस्यप्रसिद्धौसौलभ्यान्नाप्रसंगः विशेषरूपे
णसंसर्गतायाअभ्युपगमपक्षेतु नैतदुपपद्यतेइतिप्रकारांतरमनुसरणीयं तत्त्वविशेष्यतावछेदकतावछेदकसंबंधेनरवि
शेष्यतावछेदकप्रतियोगिकसंबंधान्यसंबंधावछिन्नाधेयतानिवेशनीप उक्तस्थलेविशेष्यतावछेदकतावछेदकसं
रू

वंधसंयोगान्यविशेष्यतावछेदकीभूतद्रव्यप्रतियोगिकसमवायादिसंवंधेनत्रविशेषणतादिसंवंधावछिन्नायाआधेयता
याःप्रकाराभावाधिकरणगुणादिनिरूपितायाःसत्ता[illegible]धिकरणत्वादेरप्रसिद्धत्वादप्रसिद्धिनिवृत्तिः अवछिन्नविशेष्यता
वछेदकतास्थलेविशेष्यतावछेदकप्रतियोगिकेतत्रविशेष्यतावछेदकतावछेदकावछिन्नप्रतियोगिताकत्वंनिवेशनी
यं तेनप्रमेयस्यसंयोगसमवायादिना विशेष्यतावछेदकतास्थलेव्यतिरेकप्रकारानतिरिक्तवृत्तित्वघटितसंवंधोपिनि
र्वहति अन्यथा सर्वेषामेवसंवंधानां विशेष्यतावछेदकीभूतप्रमेयप्रतियोगिकत्वेनतत्प्रतियोगिकसंवंधेनत्र संवं

८० धाप्रसिद्धावत्राप्रसंगोदुर्वार एवंविशेष्यतावछेदकतावछेदकप्रमेयत्वाद्यवछिन्नप्रतियोगिताकेतरत्वप्रसिध्यत्येव घ
टत्वाद्यवछिन्नप्रतियोगित्वविषयितादिरूपः संबंधः तादृशसंबंधेनप्रमेयत्वाद्यवछिन्नप्रकारकबुद्धेप्रामाण्यविरहेण त
त्रप्रमेयत्वाद्यवछिन्नप्रतियोगिताकत्वानभ्युपगमात् नचैवंगुणाद्यात्मकप्रकाराभाववतिघटत्वाद्यवछिन्नविषयता
निरूपकज्ञानादेर्घटत्वाद्यवछिन्नप्रतियोगिताकाभावादेश्चनिरुक्तसंबंधांतर्गतघटत्वाद्यवछिन्नविषयत्वप्रतियोगि
त्वादिसंबंधेनघटत्वाद्यात्मकविशेषधर्मावछिन्नानांसर्वेषामेवप्रमेयाणांवर्त्तमानत्वात्प्रसंगोदुर्वार एवेतिवाच्यम्

प्रकाराभावाधिकरणानुयोगिकनिरुक्तसंवंधप्रतियोगितानवच्छेदकविशेष्यतावच्छेदकतावच्छेदकधर्माश्रयत्वरूप
स्यानतिरिक्तवृत्तित्वस्यसंवंधघटकतयानिवेशनीयत्वाददोषात् प्रमेयस्यघटादेस्तादृशाधेयत्वाश्रयत्वेपिप्रमेय
त्वस्यविशेष्यतावच्छेदकतावच्छेदकस्यदर्शितत्तानाभावाद्यनुयोगिकनिरुक्तसंवंधप्रतियोगितानवच्छेदकत्वान
पायाद्यधिकमस्मत्कृतमहाप्रभादावनुसंधेयम् इदंतुबोध्यंकेवलान्वयिनोवाच्यत्वादेःप्रकारतास्थलेनिरुक्तप्र
काराभावाप्रसिद्ध्यानिरुक्तानतिरिक्तवृत्तित्वघटितसंवंधभानमप्रसिद्धं नचविशिष्टसंवंधस्याप्रसिद्धत्वेप्यभावांत

८१ रव्याप्यत्वत्वाद्यवच्छिन्नस्यप्रतियोगितासंसर्गेणवैशिष्ट्याद्यवगाहिबोधःप्रसिध्यत्येव संसर्गांशेपिभ्रमसंभवस्यासकृ
दावेदितत्वादितिवाच्यं तथासत्यभ्रांतस्योत्पद्यमानतादृशाकेवलान्वयिप्रकारावच्छेदकत्वावगाहिनोबोधस्यानुभूयमा
नस्यानुपपत्तेः अतोव्यापकसामानाधिकरण्यव्याप्यात्मकमनतिरिक्तवृत्तित्वंसंसर्गघटकतयावश्यंनिवेश्यं तत्र
सामानाधिकरण्यांशनिवेशनस्यप्रयोजनविरहात् लाघवमनुसृत्यविशेष्यतावच्छेदकस्यविशेष्यतावच्छेदकता
वच्छेदकावच्छिन्नस्यवाव्यापकेनप्रकारेणव्यापकतावच्छेदकीभूतप्रकारतावच्छेदकावच्छिन्नेनवानिरूपितत्वंप्रकारता

वच्छेदकसंसर्गतावच्छेदकेभासमानत्वमुपगंतव्यं दोषवशात्तुकदाचित्केवलान्वयिप्रकारस्थलेपिदर्शितानतिरिक्तवृत्ति
त्वघटितविशेष्यतावच्छेदकसंसर्गभानंभवत्येवव्यतिरेकिप्रकारस्थलेतुउभयविधतादृशसंबंधज्ञानमभ्रांतस्याप्युप
पद्यमानमनपन्हवंतत्रनियामकेप्रयोजकसामग्रीसत्वासत्वेवेदितव्येव्यापकताचोपदर्शितयास्मत्कृतमहाप्रभाघकृ
दिशाचयथायथंप्रतियोगिवैयधिकरण्यघटनाघटनाभ्यांपरिष्कृत्यनिवेशनीया तत्रापियद्यद्विशेषणघटिताघटित
व्यापकतासंभवस्तद्विशेषणघटिताघटितव्यापकताभानंतत्तत्प्रयोजकसमवधानासमवधानाभ्यांसमाधेयम् ॥

८२ क्वचिदेकैकविधस्यक्वचिच्चमिलितस्यद्वित्र्यादिविधस्यव्यापकत्वस्यप्रयोजकमेलकाधीनंभानमिष्टमेवान्यत्सर्वंपूर्वो
नयादिसावसेयततोप्यतिरिच्यमानमस्मत्कृतमहाप्रभादावनुसंधेयम् अन्यविधमपिप्रकारावच्छेदकत्वंविशेष्यताव
च्छेदकेभासतेमूलावच्छिन्नोवृक्षःकपिसंयोगवान्नद्वितीयक्षणावच्छिन्नोघटोगंधवानित्यादौ तच्चस्वरूपसंबंधरूपम
तिरिक्तंचेत्यभिहितप्रायम् तत्रधर्म्मविशेषणीभवनमूलाद्यक्षणादिकंपारतंत्र्येणप्रकारस्यापिकपिसंयोगाभाव
गंधादेरवच्छेद्यतासंबंधेनविशेषणीभूयभासतेइतिनाहश्यावच्छेदकत्वंभावाभावयोरेकत्रसमावेशोवच्छेदकमंतरान

संभवतीत्यवच्छेदकताभ्युपगमेउपायांतरं अव्याप्यवृत्तित्वं स्वसमानाधिकरणाभावप्रतियोगित्वं व्याप्यवृत्तिरपिद्रव्य
त्वादेःसंवंधांतरावच्छिन्नप्रतियोगिताकस्यवैशिष्ट्यस्याभावस्यतद्रूपावच्छिन्नप्रतियोगिताकस्यचस्वसमानाधिकरणाभाव
स्यप्रतियोगित्वेपिस्वसमानाधिकरणाभावीययद्रूपावच्छिन्नयत्संवंधावच्छिन्नप्रतियोगिताश्रयत्वं यस्यतस्यतेनरूपे
णतेनसंवंधेनाव्याप्यवृत्तित्वमितिविवक्षणान्नातिप्रसंगइत्यवधेयम् इत्यवच्छेदकत्वपर्यालोचनसंक्षेपः विशेष्य
त्वाविशेषणत्वातिरिक्तविशिष्टवोधविषयत्वंसंवंधत्वं घटइत्याद्याकारकज्ञानादिनिरूपिताघटघटत्वयोःसमवाय

८३ ।वृत्तिर्विषयपत्ताघटनिष्ठविशेष्यताताघटत्वनिष्ठविशेषणतात्त्वाभिन्नैवेतिसैवसंबंधताप्रतियोगितानिरूपक
संसर्गविधयावच्छेदकतात्मकोवच्छेदकताविशेषश्चसंभवतिसंबंधत्वंतत्त्वस्वरूपसंबंधत्वरूपं पदार्थांतरंवेतिपू
र्ववदेवावेदितव्यं इतिसंबंधत्वम् अधिकरणत्वमप्यतिरिक्तःपदार्थः सचधर्मविशेषेणसंबंधविशेषेणचाव
च्छिद्यते पर्वतोवन्हित्वावच्छिन्नाधिकरणमित्याद्याकारकप्रतीत्यापारतंत्र्येणावच्छेद्यतासंबंधेनपर्वतत्वावृत्तिनोधर्म्म
विशेषणत्वाधिकरणतांशेविषयीकरणात् संयोगेनाधिकरणंसमवायेनाधिकरणमित्यादिव्यवहाराच्च न

नचसंयोगादिकंसंवंधरूपमेवास्त्वाधारत्वंकिमतिरिक्तपदार्थकल्पनेनेतिवाच्यम् पर्वतादिसंयोगिनोदहनादेःसंयो
गेनपर्वताद्यधिकरणत्वापत्तेः एतेनतत्तत्प्रतिवंधकसंयोगसंवंधावच्छिन्नतदधिकरणत्वं अभिन्नस्यापिविशेष
णांतरविशिष्टस्यस्वावच्छिन्नत्वंनाप्रामाणिकः कारणताव्याप्त्यादेरवच्छेदकधर्मस्वरूपनापत्तेःदंडत्वधूमत्वाद्या
त्मकघटादिकारणत्ववन्ह्यादिव्याप्त्यादेर्दंडत्वधूमत्वाद्यवच्छेद्यत्वस्यावश्योपेयत्वात् इत्थंचशरीरादिसंयोगिनोऽ
पिहारमुकुटादेर्नशरीराद्यधिकरणत्वप्रसंगः तत्संयोगस्यशरीरादिपतनाप्रतिवंधकत्वात् नचावाच्यमेकस्मि

वा
८४ न्नेऽधिकरणेऽधुनस्याप्रसिद्धपतनकस्यघटादेरधिकरणतायामव्याप्तिर्हारमुकुटादेःसंयोगस्यस्वपतनंप्रतिबंधक
स्यस्वस्मिन्नप्यबाधितत्वेनस्वस्मिन्स्वाधिकरणत्वापत्तेश्चेतिवाच्यं तद्भिन्नत्वविशिष्टस्तन्निष्ठस्यपतनोत्पत्तिविरहस्यप
तनविरहस्यवाप्रयोजकः संयोगस्तदधिकरणत्वमित्यस्यविवक्षणीयत्वात् अप्रसिद्धपतनकोपिवर्त्तमानस्यपत
नोत्पत्त्यभावस्यप्रयोजकस्तदीयसंयोगोभवत्येवकारणविरहत्वेनप्रतिबंधकस्यकार्यानुत्पादप्रयोजक[redacted]
[redacted]ताचावश्यकत्वात् अतोनाप्रसंगः स्वस्मिन्स्वभेदासत्वेनतद्विशिष्टत्वासत्वाच्चनाप्रसंगइत्यपिनिरस्तंबध्या

द्यधिकरणत्वासंग्रहणात् तेजसोर्द्दहनादेः पतनकरणीभूतगुरुत्वविरहेणपतनानुत्पत्त्यानन्त्विष्टपतनाप्रसिद्धेःप
तनाभावादेःप्रसिद्धावपिनसंयोगस्तन्निष्ठपतनाभावादिप्रयोजकोगुरुत्वविरहेणावश्यकेनान्यथासिद्धत्वाद्दन्यथा
तत्प्रतियोगिकसंयोगविरहेक्वचित्पतनस्यवाप्रसंगात् पतनप्रतिबंधकत्वाद्यप्रतिसंधानेऽधिकरणत्वव्यवहार-
स्यतावानेवविषयइतिप्रतिवादस्यापिधातुमशक्यत्वात् व्याप्त्यादिघटकसकलपदार्थाप्रतिसंधानेव्याप्तिज्ञाना
नुमित्याद्यनुदयवत्पतनप्रतिबंधकत्वाद्यप्रतिसंधानेधिकरणत्वज्ञानानुदयस्यापिसमाधातुंशक्यत्वात् आधे

८५ यत्ता निरूपकत्वमधिकरणत्वमस्तु आधेयत्ताव्यतिरिक्तता मित्युक्तिस्त्वतीवायुक्ता अधिकरणत्वमतिरिक्ततां तन्निरू
पकत्वैवोक्त्याधेयत्वेनेत्युक्तावेकत्र विनिगमकस्य दुर्लभतरत्वात्तस्मादधिकरणत्वमाधेयत्वं चोभयमेवातिरिक्तमभ्युपगं
तव्यं इदंपुनरिहावधेयं संबंधानुयोगित्व यत्र च येन संबंधेन यत्प्रकारिका धीः प्रामाणिकी तत्रैव तदीयतत्संबंधानु
योगित्वमंगीक्रियते मेवास्तु इदमिहेत्यादिप्रतीतिप्रमापितमधिकरणत्वं सामान्यतः विशेषतस्तु तत्प्रतियोगिकत
त्संबंधानुयोगित्वं तत्संबंधावच्छिन्नतदधिकरणत्वम् यत्र च येन संबंधेन यत्प्रकारिका धीः प्रामाणिकी तत्रैव तदी

यत्तत्संबंधानुयोगित्वमंगीक्रियते प्रतियोगीत्यनुयोगीत्यनेनसंबंधेविशिष्टधीर्नप्रामाणिकीतिनप्रतियोग्यनुयोगि
भाववैपरीत्यशंकापर्वतेवह्निर्धटेरूपमित्यादिकल्पप्रत्ययः संयोगसमवायादिप्रतियोगित्वमेवसंसर्गविधया वगा
हते ननुसंयोगसमवायादिकं नचसमवायस्यैकत्वपक्षेवाय्वादौरूपाद्यधिकरणत्वापत्तिरितिवाच्यं तत्प्रतियोगि
कत्वविशिष्टतत्संबंधनिरूपितानुयोगितायाएवतत्संबंधावच्छिन्नतदधिकरणतात्वोपगमात् रूपादिप्रतियोगिक
त्वविशिष्टनिरूपतायाश्चवाय्वादावनुपगमेनातिप्रसंगविरहात् एवमाधेयत्वमपिसामान्यतःसंबंधप्रतियोगि

८६ त्वमेव विशेषणतात्संबंधप्रतियोगित्वम् तत्संबंधावच्छिन्नाधेयत्वं तदनुयोगिकत्वविशिष्टतत्संबंधनिरूपितप्रतियोगित्वं
तत्संबंधावच्छिन्ननिरूपिताधेयत्वं तेनतद्रूपाद्देवाद्यादिनिरूपिताधेयत्वप्रसक्तिः तदिदमधिकरणत्वमाधेयभेदाद्भिद्यते।
अनुयोगितारूपत्वेपिदैशिकविशिष्टनिरूपितायास्तस्यानिरूपकभेदादेवभेदस्यावश्यकः एकमेवचेदधिकरणत्वंसर्वाधेय
निरूपितंस्यात् सर्वेषांसर्वाधारताप्रसंगोदुर्वारःस्यात् नचानुगतप्रत्ययानुपपत्तिरेवमिति।तिवाच्यं अधिकरणतात्वा
त्मकाखंडधर्म्मान्तरस्यापगमेनानुगतप्रतीत्यादेरपिनिर्वाहात् निरूपकतावच्छेदकभेदस्याधिकरणताभेदकत्वारेकथ

र्मावच्छिन्ननिरूपितमधिकरणत्वमेकमेवेत्यपि न शक्यं समाधातुं गुणत्वेन गंधस्याधिकरणं जलमित्यादिप्रत्ययप्रा
माण्यापत्तेः इत्थं च समनैयत्य(क)मपि नाधिकरणतानामभेदमुपपादयति तद्रूपाद्यधिकरणसमनियततातद्रसा
द्यधिकरणताश्रयेतद्रूपत्वेन तद्रसस्याधिकरणमिदमित्यादिप्रत्ययप्रामाण्यापत्तेर्बाधकत्वात् यद्यप्येतादृशप्र
तीतेस्तद्रूपत्वाद्यवच्छिन्नतद्रसादिनिष्ठनिरूपकताकाधिकरणताश्रयोविषयस्तथा च तद्रसादिनिष्ठायां निरूपकता
यां तद्रूपत्वाद्यवच्छेद्यताविरहादेव प्रतीतेर्भ्रमत्वमुपपद्यते इति शक्यते वक्तुं तथापि गंधादिनिष्ठनिरूपिकतायागु

८७ णत्वादिना सामानाधिकरण्येनावच्छेद्यतासंभवति तदंशे भ्रमत्वस्य वक्तुमशक्यतया पूर्वदोषो दुरुद्धर एव न चातिप्रसंगे
क्ततया तत्राप्यवच्छेदकत्वमसंभवदुक्तिकमिति वाच्यं अधिकरणतैक्ये तन्निरूपकतायाश्चैकत्वेन नातिप्रसक्तावा
दुणत्वस्य निरूपिताव्यक्तिभेदोपगमेपि तज्ज्ञानानुगतरूपावच्छिन्नस्यानतिप्रसक्तत्वं दंडत्वादौ घटादिपूर्ववर्त्तित्वादी
नामिव सुवचमिति इहेदमित्यादावधिकरणत्वमाधेयत्वं वा सप्तम्यर्थो निरूपकत्वमाश्रयत्वं वा तदन्वयनियामको
संसर्गः तत्रास्तीत्यादिक्रियाध्याहारात् कारकत्वनिर्वाहः इत्येके सप्तम्यधिकरणे चेति चकारस्यानुक्तसमुच्चायार्थकतया

विनापिक्रियायोगमकारकरूपायामेवाधिकरणतायांसप्तमीत्यपरे तन्नेघटोभासतइत्यादौविषयतात्मकक्रियान्व
यिनिरूपितत्वमपिनिरूपकत्वसंसर्गावच्छिन्नाधेयतारूपमेवसप्तम्यर्थः गृहेपचतिस्थाल्यांपचतीत्यादावाश्रयघटितपरं
परासंसर्गावच्छिन्नमेवाधिकरणत्वादिकंसप्तम्याप्रतिपाद्यतेइति तथैववस्तुगत्निरूपेपातेनकर्तुः क्रियाधारत्वेपिदेवदत्तः
स्वस्मिन्ग्रामंगच्छतीत्यादिप्रयोगागत्तामप्रामाण्यमुपपद्यते अधिकमस्मत्कृतमहाप्रभादिषुचेदितव्यं इदंतुबोध्यं विशे
षधर्मावच्छिन्नाधिकरणताव्यक्तिभिरवश्यमभ्युपगंतव्याभिरेवसामान्यधर्मोपलक्षितनिरूपकत्वेनभासमानाभिःसामा

८८ न्यधर्मावलीढानामधिकरणताप्रत्ययोपपत्तेः सामान्यधर्मस्याधिकरणतानिरूपकतावच्छेदकत्वमप्रामाणिकं नचगु
णत्वेन रूपस्याधिकरणं तेजइत्यादिप्रतीत्या गुणत्वादेरधिकरणतानिरूपकतावच्छेदकत्वं सेत्स्यतीति वाच्यं तादृशप्रती
तेरसिद्धत्वात् रूपाधिकरणं गुणाधिकरणमित्याद्याकारिकैव प्रतीतिः सार्वलौकिकानुभवसिद्धा रूपत्वगुणत्वाद्युपलक्षि
तनिरूपिताधिकरणत्वावगाहितया सोपपादनीया युज्यते चानिरूपकतावच्छेदकभेदस्याधिकरणताभेदकता कथमन्य
थानिरूपकीभूतायाः सत्तायाः स्वभेदे ऽपि द्रव्यान्यत्वविशिष्टसत्तात्वावच्छिन्ननिरूपकताकाधिकरणतातो गुणकर्मान्यत्व

विशिष्टसत्तात्वावच्छिन्ननिरूपकताकाधिकरणता [redacted] भिन्नास्यानस्या -भिन्नत्वेगुणोगुणकर्म्मान्यत्वविशिष्टस
त्तावानित्यादिप्रतीतीनामप्रामाण्यंनोपपद्यते नचविशिष्टंविशेष्यादनतिरिक्तमेवेत्याधेयभेदस्याधिकरणताभेदकत्वेपिनै
तादृशप्रतीतीनांप्रामाण्यायत्तनिर्गुणकर्म्मान्यत्वविशिष्टसत्तायागुणादावद्वत्तेरितिवाच्यम् विशिष्टस्यातिरिक्ततायाश्च
नेनविशिष्टकल्पनागौरवादिदोषेणप्रतिक्षणंयत्तत्किंचिद्विशेषणावश्यंभावेनक्षणभंगप्रसंगादिनाचनिराकृतत्वात्
इहेदंपुनःसूक्ष्मतममेमालोचनीयं यत्किंचिद्विशिष्टस्यविशिष्टांतरापेक्षयासामान्यत्वेप्यधिकरणतानिरूपकतावच्छेदक

८१

त्वमावश्यकं यथा गुणकर्म्मान्यत्वविशिष्टसत्तात्वं सत्तात्वमपेक्ष्य विशेषीभूतमपि पृथिवीत्वघटत्वद्रव्यत्वगुणत्वमित्यादिविशि
ष्टसत्तात्वमपेक्ष्य सामान्यीभूतं भवत्येव द्रव्यनिष्ठाधिकरणतानिरूपकतावच्छेदकं तदनभ्युपगमे हि गुणकर्म्मान्यत्वविशि
ष्टसत्ताधिकरणत्वावगाहिप्रतीतेस्तादृशविशिष्टसत्तात्वोपलक्षितनिरूपिताधिकरणत्वं विषयोऽवश्यं वक्तव्यस्तथाविधा
धिकरणतायाश्च गुणादावपि सत्त्वेन गुणो गुणकर्म्मान्यत्वविशिष्टसत्तावानित्यादिप्रतीतिः प्रामाण्यप्रसंगो दुर्वारः स्या
त् सामान्यघटितविशेषस्यैवेयं रीतिः यत्तु सामान्येनाघटितं व्याप्यं विशेषान्तरस्य च व्यापकं तदवच्छिन्नमधिकरणतानि

रूपकंनैवाभ्युपगंतव्यं रूपनिरूपिताधिकरणताद्यवगाहिप्रतीतीनांतद्रूपत्वाद्यवच्छिन्ननिरूपकताकाधिकरणतावगाहित
यैवोपपत्तौरूपत्वादीनामधिकरणतानिरूपकतावच्छेदकत्वस्याप्रामाणिकत्वस्यादितिवहवः वयंतुगुणकर्म्मान्यत्वविशिष्ट
सत्ताधिकरणंद्रव्यमित्यादिप्रतीतीनांमिवसत्ताधिकरणमिदमित्याद्याकारकप्रतीतीनामप्यनुभूयमानविशिष्टवैशिष्ट्या
वगाहित्वंदुरपह्नवमिति सामान्यधर्म्मस्याप्यधिकरणतानिरूपकतावच्छेदकत्वं तादृशप्रतीतिप्रमापितमनिर्वाच्यमित्यादि
कमधिकमस्मत्कृतमहाप्रभायामनुसंधेयमितिप्रतीमः॥ इत्याधेयताधिकरणत्वे॥ ॥ज्ञानजन्यविषयत्वंनिरूप्य

९०

त्वं ज्ञानजनकज्ञानविषयत्वं निरूपकत्वं संबंधिद्वयनिरूप्यपदार्थप्रत्यक्षे संबंधिनोर्ज्ञानस्य कारणत्वादनुयोगिप्रतियोगिज्ञा
नजन्यज्ञानविषयतासंयोगसमवायविशेषणताकारणत्वकारणत्वप्रतियोगित्वादिसंबंधेष्वनेनेतिसांप्रदायिकानांमतं।
अनुयोगिप्रतियोगिसाधारणस्यैतस्याप्यनुगतस्य संबंधज्ञानजनकज्ञानविषयत्वदुर्निर्वचत्वात् तद्विषयकज्ञाननिष्ठजन्य
तानिरूपितजनकताश्रयज्ञाननिरूपितविषयतायाः सर्वविषयकं नित्यज्ञानं जन्यमपि योगिज्ञानं सामान्यलक्षणाद्य
धीनमस्मदादिज्ञानं कतिपयवस्तुविषयकं नानाज्ञानादिकं वादाय केवलान्वयित्वेनातिप्रसंगात् तादृशजनकतावच्छेद

कविषयतोक्तावपिसएवदोषः इतरज्ञानजन्यतायास्त्वपिसमूहालंबनाद्यात्मकतद्विषयकज्ञाननिष्ठत्वात् तद्विषयतया
तद्विषयताघटितधर्मेणावावच्छिन्नत्वस्यजन्यताविशेषणत्वेतुघटत्वंविशिष्टवैशिष्ट्यबुद्धित्वाद्यवच्छिन्नायाजन्यतायाः सम
वायविषयत्वेनाप्यवच्छिन्नतयानिरूपितजनकतायाघटत्वप्रकारकबुद्धित्वावच्छिन्नायाअपिसमवायविषयत्वेनावच्छे
द्यतयास्वस्मिन्स्वनिरूपकत्वापत्तिर्दुर्वारा सांसर्गिकविषयतान्यत्वेनविषयताविशेषणेऽपिसमवायादिप्रकारकज्ञा
नत्वाद्यवच्छिन्नजन्यतानिरूपितसमवायाभावप्रकारकनिश्चयाभावत्वाद्यवच्छिन्नजनकतावच्छेदकघटत्वविषयतायाः

९१ समवायादावपि सत्त्वात् स एवातिप्रसंगः साक्षादवच्छेदकतानिवेशेऽपि समवायादिविशिष्टवैशिष्ट्यबुद्धित्वाद्यवच्छिन्नज
न्यतानिरूपितसमवायादिप्रकारनिष्ठयत्वाद्यवच्छिन्नजनकतावच्छेदकविषयतामादाय स एव दोषः ज्ञानत्वजन्यप्रकारत
योरेकत्रद्वयमिति रीत्याभासमानयोरुभयोरेव तादृशजनकतायाः साक्षादवच्छेदकताया विनिगमनाविरहादिना महा
प्रभादिष्वप्युपपादितत्वात् तादृशरीतिमन्तरेण प्रकृतिप्रत्ययोरप्यनुयोगिनोरपि संगमयितुमशक्यत्वात् वस्तुतस्तु नि
रूप्यत्वं निरूपकत्वं च स्वरूपसंबंधरूपं पदार्थान्तरं वेत्याद्यभिहितप्रायमेवैतदनुसरणीयमिति सारं ॥ इति निरूप्यत्वनिरूपकत्वे ॥

पर्य्याप्तिरपित्वरूपसंबंधविशेषः पदार्थान्तरवाव्यमेकोन ------ द्वावित्यादिप्रतीतीनां प्रामाण्यनिर्वाहनदभ्युपग
मस्यावश्यकः समवायेनद्वित्वस्योभयत्रसत्वेनतत्संबंधावच्छिन्नप्रतियोगिताकतदभावस्यैकस्मिंस्तदाश्रयेपिबाधितत्वात्
द्वित्वावगाहनेप्रतीतेर्भ्रमत्वस्यावश्यकत्वात् एवमेकोद्वावित्यादिप्रतीतीनांप्रामाण्यमपिपर्य्याप्त्यनभ्युपगमेवारयितुमश
क्यमेकस्मिन्समवायेनद्वित्वस्याबाधितत्वात् नचांगीकृतायामापिपर्य्याप्तौसमवायेनद्वित्वमवगाह्यएकोद्वावितिप्र
माप्रतीतिर्नशक्यतेवारयितुं किंचपर्य्याप्तिरप्युभयत्रसत्वेनतत्संबंधावच्छिन्नप्रतियोगिताकद्वित्वात्यन्ताभावस्यतत्संबं

९२ धावच्छिन्नद्वित्ववृत्तिप्रतियोगितावच्छेदकताकान्योन्याभावस्यचैकस्मिन्नपिबाधितत्वादेकोनद्वाविंशादिप्रतीतीनांनियमतो
विशिष्टानुयोगिकवैशिष्ट्यबुद्धित्वोपगमात् द्वित्वाद्यवच्छेद्यतासंबंधेनतृतीयपर्याप्त्यवच्छिन्नानुयोगिकत्वसंबंधेनवाविशि
ष्टतावच्छेदकस्यैकत्वस्यभानावश्यंभावेनतदंशेऽप्रामाण्यस्यप्रथमायामुपपत्तेः द्वितीयायांविशिष्टतावच्छेदकस्यैकत्व-
स्यावच्छेद्यतासंसर्गेणाभावेनतृतीयसंसर्गेवाभानोपगमेनैकत्वस्यद्वित्वाद्यनवच्छेदकत्वयातदवच्छेदेनतदभावस्याप्य
वृत्तेरबाधितत्वेनप्रामाण्यस्यदुष्परिहरत्वात् समोहिव्यासज्यवृत्तिधर्मोव्यासज्यवृत्तेः पर्याप्त्यनुयोगितावच्छेदकइतिनैक

त्वे द्वित्वपर्य्याप्त्यनुयोगितावच्छेदकमतत्तद्व्यवच्छेदेन द्वित्वं बाधितं तत्तद्भावादिश्चाबाधितः द्वित्वं तु भवति द्वित्वपर्य्याप्त्यनुयो
गितावच्छेदकं स्वमन्यद्वेति तद्व्यवच्छेदेन द्वित्वमवगाहमानाया इमौ द्वावित्यादिप्रतीतेः प्रामाण्यं तद्भावादिकमवगाहमा
नाया इमौ न द्वावित्यादिप्रतीतेरप्रामाण्यं चोपपद्यते इदमत्रालोचनीयं माभूत् पर्य्याप्तिरेकत्वावच्छिन्नत्वस्पर्शितरी
त्याभासमानस्य द्वित्वादेर्बाधितत्वादेवैको द्वावित्यादिप्रत्ययानामप्रामाण्यमुपपद्यते अस्तु च द्वित्वादेरेव द्वित्वादिकम
वच्छेदकमेकत्वादिकं चानवच्छेदकमिति इमौ द्वावित्यादिप्रत्ययानां प्रामाण्यमप्युपपद्यते नैवोपपद्यते चैको न द्वावित्या

१३ द्विप्रत्ययप्रामाण्यं एकत्वावच्छेदेन समवायसंबंधावच्छिन्नप्रतियोगिताकस्य द्वित्वात्यंताभावस्य तत्संबंधावच्छिन्नद्वित्ववृत्ति
प्रतियोगितावच्छेदकताकान्योन्याभावस्य च प्रतीत्यनुरोधेनोपगंतुं शक्यत्वेनावच्छिन्नत्वोपपत्तेरिति समवायेनोपपन्नोप
र्याप्तौ प्रमाणाभावः यत्तु पर्याप्त्याख्यसंबंधानुपगमे आकाशद्वित्वादिप्रत्ययानां प्रामाण्यापत्तिः आकाशमात्रसमवेत
द्वित्वस्याप्रसिद्धत्वेप्यन्यसाधारणस्य तस्याकाशेपि समवेतत्वात् न च समवाय एव द्वित्वस्य संबंधो धर्म्मितावच्छेदकव्याप्य
त्वं च द्वित्वादेः संसर्गतावच्छेदककोटाववश्यं भासत इति नियमोऽभ्युपगंतव्यस्तथा च द्वित्वसमवायेप्याकाशत्वव्याप्य

ताविरहात्तादृशप्रतीतेरप्रामाण्यमुपपद्यत इति वाच्यं समवायस्यैकत्वेन घटत्वादिव्याप्यतायास्तत्रबाधेन घटावित्या
दिप्रत्ययानामप्रामाण्यापत्तेरतः पर्य्याप्त्याख्यसंबंधोपगमस्यावश्यकस्तदुपगमे च तत्र धर्म्मितावच्छेदकव्याप्यत्वस्य सं
सर्गितावच्छेदकतयाभाननियमोपगमसंभवान्नतादृशप्रतीतीनांप्रामाण्यंनापि घटावित्यादिप्रत्यादिप्रत्ययानामप्रा
माण्यंप्रसक्तमापादयितुंकस्मांश्चिदपिद्वित्वपर्य्याप्तेराकाशत्वादिव्याप्यताविरहात्घटद्वयद्वित्वपर्य्याप्तेश्चघटत्वव्याप्यता
यामबाधितत्वादितिकेचिन्मन्यंते तदप्ययुक्तं समवायनानात्वपक्षेनवीनोपगतेतस्मिन्धर्म्मितावच्छेदकव्याप्यताभा

१४ ननियमोपगमेदर्शितानुपपत्त्यनुपस्थितेः घटद्वयादिवृत्तित्वादेःसमवायस्यघटत्वादिव्याप्यतायाअवाधितत्वात् घटपटा
वित्यादिप्रत्ययानामपिनाप्रामाण्यप्रसक्तिस्तत्रहीमावित्यादिविशेष्यसमर्पकमपेक्षणीयं तथाचविशेष्यतावच्छेदकी
भूतेदंत्वादिव्याप्यत्वंघटपटवृत्तित्वोपरक्तद्वित्वसमवायेअवाधितमितिप्रतियोगिभेदस्यसंबंधभेदकतयाघटपटवृत्तिद्वित्वा
दिसमवाययस्यघटत्वादिव्याप्यताविरहेणघटोघटपटावित्यादिप्रत्ययानांप्रामाण्यंनापादयितुंशक्यं समवायैकमते
ऽपिद्वित्वत्वस्योभयावृत्तिधर्म्मावच्छिन्नप्रतियोगिताकत्वविशिष्टसमवायत्वावच्छिन्नव्याप्यताभावोपगमेन तादृशाश्चघटत्वा

द्व्याप्यतायाश्चपिसमुद्वायेसत्वेननाप्रसंगात्तिप्रसंगो अवच्छिन्नांशेएवपारतंत्र्येणव्याप्यतासंसर्गेणप्रकारतायाधर्म्मि
तावच्छेदकस्यभानेनाश्रावनायुक्तदूषणाप्रसक्तेः एतेनव्याप्यत्वंनस्वाभाववदवृत्तित्वरूपंनिवेशयितुमशक्यंप्रमेयादिव्याप्तौ
धर्म्मितावच्छेदकीभूतप्रमेयत्वादेरभावाप्रसिद्धेः प्रसंगात्एतेनव्यापकसामानाधिकरण्यरूपंतत्त्वस्वावच्छिन्नसमानाधिकरणा
भावप्रतियोगितानवच्छेदकधर्मावच्छिन्ननिरूपितेनस्वावच्छिन्नसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकनि
रूपितेनवासामा।नाधिकरण्याभावप्रतियोगितानवच्छेदकधर्मावच्छिन्नानिरूपितेनस्वावच्छिन्नसामानाधिकरण्यान्योन्या

९५ भाववृत्तित्वयोगितानवच्छेदक[redacted]निरूपितेनवासामानाधिकरण्येनविशिष्टंयत्स्वंतद्वत्त्वरूपंनविशिष्टस्यव्याप्यता
निर्वाहःविशेषणानांतराणामावश्यकत्वेनानिवेशनंपूर्वाभिहितरीत्याप्रवेशनंतव्यमेवंतत्तद्धर्मावच्छिन्नव्याप्यतायाःनिवेशा
न्व्यापकसामानाधिकरण्यसंसर्गतावच्छेदकौकोटौभानोपगमेगौरवमतोलाघवात्पूर्व्याप्तिसिद्धेःसमवायैक्यमतेतु
वृत्तिमुक्तिरपिप्रत्युक्तापर्याप्तिमुपगच्छतापितत्तद्धर्म्मितावच्छेदकव्याप्यताभानोपगमस्यावश्यकत्वयाहित्वाद्यंशेनरी
यव्याप्यताभानोपगमेगौरवाननवशात्दर्शितविशिष्टसमवायत्वाद्यवच्छिन्नव्याप्यतयात्रनिवेशात्व्यापकसामाना

धिकरणपरूपव्याप्तेरवश्यनिवेश्यत्वेपि विशिष्टसंग्रहानाग्रहेण व्याप्यतावच्छेदकताघटितस्यैव तस्य सुनिवेशत्वात् अ
थैकत्वानवच्छिन्नभपर्याप्तिप्रतियोगित्वं व्यासज्यवृत्तित्वं द्वित्वादिपर्याप्त्यनुयोगितायाः एकत्वेनानवच्छेदाद्द्वित्वादीनां त
थात्वमेकत्वद्रव्यत्वादिपर्याप्त्यनुयोगितायाः एकत्वेनावच्छिन्नतया तेषामतथात्वं एवं चैतादृशव्यासज्यवृत्तित्वस्य निर्व
चनानुरोधेन पर्याप्तिसिद्धिरावश्यकी नचैकत्वेतरसंख्यात्वमेव व्यासज्यवृत्तित्वमिति निर्वक्तुं शक्यं संख्येतरस्य प्रतियोगि
तावच्छेदकत्वादेरपि व्यासज्यवृत्तितया आवश्यकत्वादिति वेत्का क्षतिः व्यासज्यवृत्तित्वस्यानिर्वाच्यत्वेन हि कश्चिन्नष्टार्थः

९५ शास्त्रैकसमधिगम्यं व्यासज्यवृत्तित्वमुपजीवतिरेकेन तन्निर्वचनाग्रहः परपराणीयः स्यात् वह्नित्वमेकं न महानसीयवन्ह्यभाव
प्रतियोगितावच्छेदकमित्यादिप्रतीत्या वन्हित्वगतैकत्वाद्यवच्छेदेन तादृशाभावप्रतियोगितावच्छेदकत्वस्य पर्य्याप्तिसंबंधाव
च्छिन्नप्रतियोगिताकोऽभावो विषयीक्रियते महानसीयत्ववन्हित्वोभयगतद्वित्वाद्यवच्छेदेन च पर्य्याप्तिसंबंधेन तादृशाव
च्छेदकत्वमालंब्यते स्वरूपसंबंधेन तादृशावच्छेदकतायाः प्रत्येकपर्य्यवसितत्वेन वन्हित्वैकत्वाद्यवच्छेदेन तत्संबंधावच्छिन्न
प्रतियोगिताकतदभावस्यास्यानुभवाशक्यत्वात् इति एतदनुरोधेन पर्याप्तिसिद्धिरावश्यकीत्यपि न शक्यते वक्तुं वन्हित्वैक

त्वाद्यवच्छेदेनतथाविधावच्छेदकतायाःस्वरूपसंबंधावच्छिन्नप्रतियोगिताकाभावस्यापिमूलाद्यवच्छेदेनकपिसंयोगाद्यभाव
वत्प्रतीतिबलेनोपगंतुंशक्यत्वात् तादृशद्वित्वाद्यवच्छेदेनचतादृशप्रतियोगितानिरूपितावच्छेदकतात्वावच्छिन्नप्रतियो
गिताकविशेषणतायाउपगंतुंशक्यत्वात् विशिष्टनिरूपितत्वेनसंबंधभानानुपगमेपर्याप्तिमुपगम्याप्यनिस्तारादिति
अत्रक्रमः यथानुमिनोम्यापादयामीत्यादिप्रतीत्यानुमितित्वापादनत्वादीनांसिद्धिस्तथापर्याप्नोति समवैतीत्यादिप्रत्य
यानांपरस्परवैलक्षण्यस्यानुभवसिद्धतयातदुपपत्तयेपर्याप्त्याख्यस्यस्वरूपसंबंधविशेषस्यपदार्थांतरस्यवासिद्धिरव्या

९७ हता नचतत्तत्प्रतियोगिकत्वविशिष्टः समवायादिरेव पर्य्याप्नोतीतिप्रतीतेर्विषय इतिवाच्यम् द्रव्यत्वविशिष्टसत्वादिप्रति
योगिकत्वविशिष्टसमवायसत्वेपि द्रव्यत्वंविशिष्टं सत्तावा पर्य्याप्नोतीत्यप्रत्ययात् पक्षतात्वपरामर्शत्वादीनामिव शा
शाकारपरिभाषितव्यासज्यवृत्तित्वनिर्वचनग्रहेतदनुरोधेनापि सिद्ध्यतिपर्य्याप्तिः प्रामाणिकपरिभाषितस्यप्रामाणिक
त्वादित्यपिबोध्यं सेयंपर्य्याप्तिर्व्यासज्यवृत्तिद्वित्वैकत्वजातित्वादीनांसंबंधोनेष्यते समवायविशेषणतादिभिरेव
निर्वाहिणानाग्रहात् यत्तुद्रव्यत्वादीनांपर्य्याप्तिरिवद्वित्वादीनांव्यासज्यवृत्तिसंख्यानांसमवायोनप्रामाणिकः पर्य्या

पर्य्याप्त्यैव प्रतीत्यादिनिर्वाहेणानाग्रहादिति वदंति तन्न समीचीनं जन्यभावसामान्यस्यसमवायिकारणजन्यतानियमेन
जन्यसत्वाद्यवच्छिन्नायाद्रव्यत्वाद्यवच्छिन्नसमवायिकारणतानिरूपितजन्यतायाअवच्छेदकस्यसमवायसंबंधस्यजन्यभा
वभूतद्वित्वासंख्याप्रतियोगिकत्वावश्यकत्वात् इतिपर्य्याप्तिः॥ ॥अनन्यथासिद्धत्वेसतिनियतपूर्ववर्त्तित्वंकारण
त्वं नियतपूर्ववर्त्तित्वं कारणत्वं नियतपूर्ववृत्तित्वंकार्य्यमापकत्वं तथाचकार्य्यतावच्छेदकसंबंधेनकार्य्यतावच्छेदका
वच्छिन्नस्याधिकरणेकार्य्याअव्यवहितपूर्वक्षणावच्छेदेनवर्त्तमानोयोअभावस्तन्निरूपितकारणतावच्छेदकसंबंधावच्छिन्न

१८ प्रतियोगितानवच्छेदकधर्म्मवत्त्वमर्थः घटाद्यात्मककार्याधिकरणेसमयांतरावच्छेदेनवर्त्तमानोपिदंडादेरव्याप्यवृत्त्य
त्यंताभावेनघटाद्यव्यवहितपूर्वक्षणावच्छेदेनवर्त्तनद्वृत्तिनंदंडत्वा दिकंतादृशाभावप्रतियोगितावच्छेदकमितिदंडत्वा
दिनाघटादिकारणतानिर्वाहः नचैवंयद्धर्म्मावच्छिन्नयत्संबंधावच्छिन्नप्रतियोगिताकाभावोघटाद्यात्मककार्याधिक
रणेव्याप्यवृत्तिस्तेनसंबंधेनतत्तद्धर्म्मावच्छिन्नस्यघटादिकंप्रतिकारणत्वापत्तिस्तदभावेपूर्वक्षणावच्छिन्नकार्याधिकर
णावृत्तित्वविरहादितिवाच्यं तादृशधर्म्मावच्छिन्नस्यावश्यकतत्तन्नियतपूर्ववर्त्तिभिन्नत्वेनान्यथासिद्धतयासत्यंतेनवार

णात् नचसम्यक्तमेवास्त्वव्यापकानामन्यथासिद्धतयाचवहिर्भावेणानतिप्रसंगादितिवाच्यं अनन्यथासिद्धत्वस्यानुग
तस्यदुर्निर्वचत्वेन येयेन्यथासिद्धास्तेषांतत्तद्व्यक्तित्वावछिन्नप्रतियोगिताकाभावकूटस्यलक्षणघटकीकर्त्तव्यतयाऽ
व्यापकानामन्यथासिद्धानांभेदानिवेश्याव्यापकत्वदलेनतद्वारणेलाघवात् कारणमात्रग्रहस्यव्याभिचारग्रहप्रतिवध्य
तासंपत्तयेव्यापकत्वांतनिवेशनमित्यपिकेचित् कारणव्याप्यत्वंदर्शितव्यापकताश्रयकारणसामान्याधिकरण्यपर्य
वसितमन्यथासिद्धनिरूपकत्वसहितंदर्शितकारणतानिरूपकत्वंवाकार्य्यत्वंवोध्यम् वस्तुतस्तत्तद्व्यक्तित्वावछिन्नंप्रति

११ योगिनाकार्य्योन्याभावाद्विकूटघटितस्यासर्वज्ञदुर्ज्ञेयत्वात् कार्य्यत्वं कारणत्वं चातिरिक्तः पदार्थः तयोरेकस्यान्यनिरूप
कत्वानुसंभवत्तिविनिगमनाविरहेणोभयोरतिरिक्तपदार्थत्वसिद्धेः अन्यथासिद्धव्यतिरिक्तकारणतायाश्चानभ्युपगमेनै
वातिप्रसंगभंगेन्यथासिद्धभेदानां घटकीकरणताग्रहाद्धिन्नासर्वज्ञदुर्ज्ञेयतादोषः यत्तु यद्व्यतिरिक्तपदार्थः कारणतात
हि दंडादाविंद्रियसंयोगानंतरमेव दंडत्वादीनामिव[illegible]गुणकारणतायाअपि प्रत्यक्षापत्तिः अनन्यथासिद्धत्वसहित
दर्शितव्यापकताग्रहस्यातिरिक्तपदार्थरूपकारणताग्रहं प्रति कारणतांगीकारे तु गौरवमसर्वज्ञदुर्ज्ञेयत्वं च दुःपरिहर

मितितत्प्रसारं अन्वयव्यतिरेकयोर्ज्ञानस्य कारणताग्रहं प्रतिकारणत्वाभ्युपगमेन तद्बलादेव धर्म्मीन्द्रियसन्निकर्षमात्रे
णकारणताग्रहापादनासंभवात् असर्वज्ञत्वदुर्धैर्यतायाः अपरिहृतत्वात् नचैवं दंडत्वादिकमेवास्तु कारणत्वमन्वयव्य
तिरेकज्ञानकारणतयैवानतिप्रसंगादिति वाच्यं दंडइत्याद्याकारकप्रतीतो घटकारणमित्याद्याकारकप्रतीतेर्वैलक्षण्य
स्यानुभविकतया तदुपपत्तयेव विषयवैलक्षण्यस्यावश्यमास्थेयतया दंडत्वादेस्तद्रूपतायावक्तुमशक्यत्वात् एवंनि
ष्प्रतियोगिकस्य दंडत्वादेस्तद्रूपतोपगमे घटस्य कारणमित्यादिप्रतियोगिविशेषविशेषितत्वप्रतीतेरप्रामाण्यमपि प्र

१०० सज्येन् यद्दिदंडत्वादावेवसप्रतियोगिकत्वंलाघवात् सिध्यत्वित्युच्यते नह्यघटस्यदंडइत्यादिप्रतियोगिविशेषविशे
षितत्तद्विषयकप्रतीतेरपिप्रामाण्यप्रसंगोदुर्वारः नचकारणतात्वमतिरिच्यतांनत्वदंडत्वादिनिष्ठंशुद्धदंडत्वाद्यवच्छे
द्यतायाःसप्रतियोगिकत्वस्यवावच्छेदकमंगीक्रियतामितिवाच्यं कारणतात्वातिरेकात् कारणतातिरेकेगौरवविरहात्
नचकारणतामतिरिक्तामुपगछतोपिकारणतात्वातिरेकोऽपगमआवश्यकः अन्यथानुगतप्रतीत्यनुपपत्तेरितिवाच्यं
सकलकारणानुगतायाएकस्याएवकारणतायाःकल्पनीयतयात्वत्स्वरूपेणैवानुगतप्रतीत्युपपत्तेः नचैवंतंतुर्घटकारण

मित्यादिप्रतीतीनांप्रामाण्यापत्तिस्तंतुनिष्ठायाः घटकारणताया एवद्दंडनिष्ठघटकारणतात्मकतया तत्र घटप्रतियोगिक
त्वस्याबाधितत्वादितिवाच्यं गुणकर्म्मान्यत्ववैशिष्टस्य गुणावृत्तिसत्तावृत्तित्वेपि गुणो गुणकर्मान्यत्वविशिष्टसत्तावानि
तिविशिष्टवैशिष्ट्यावगाहिप्रतीतेर्भ्रमत्ववत् तंतौ घटप्रतियोगिकत्वविशिष्टकारणतावैशिष्ट्यावगाहिप्रतीतेर्भ्रमत्वो
पपत्तेस्तत्वविशिष्टनिरूपितसंबंधविरहस्य प्रतीतिप्रमापितस्यास्यात्तुं शक्यत्वात् एतेन प्रतियोगिभेदेन विभिन्नानां
कारणतानामभ्युपगमे गौरवात् ततो लाघवेन कारणतात्वमेवैकं लक्षणं दंडत्वाद्यनुगतमभ्युपगंतुं युक्तमिति समाहितं

१०१ एकस्याएवकारणतायाउपगमात् प्रतियोगिभेदेपितद्भेदविरहात् नित्याचेयंकारणताध्वंसप्रागभावकल्पनापेक्षयाला
घवात् सिद्ध्यतीतिसारं सेयंकारणतात्रिविधा समवायिकारणताऽसमवायिकारणतानिमित्तकारणताच समवायसं
वंधावच्छिन्नकार्यतानिरूपिततादात्म्यसंवंधावच्छिन्नकारणताचसमवायसंवंधावच्छिन्नकार्य्यतानिरूपिततादात्म्य
संवंधावच्छिन्नकारणताप्रथमा यथा कपालादौघटादिकारणतासमवायसंवंधावच्छिन्नकार्य्यतानिरूपितासमवाय
समवायिसमवायान्यतरसंवंधावच्छिन्नातानाद्यवृत्तिःकारणताद्वितीया यथाघटादिनिरूपिताकपालद्वयसंयोगादिनि

ष्ठा घटादिरूपादिनिरूपिता कपालादिरूपादिनिष्ठा च कारणताद्वयभिन्नकारणतान्तरीया यथा घटादिनिरूपिता दंडच
क्रकुलालादिनिष्ठा कारणता विस्तरस्तु स्मत्कृतमहाप्रभादावनुसंधेय इति दिक् इति कार्यत्वकारणत्वे कारणीभू
ताभावप्रतियोगित्वं प्रतिबंधकत्वं अभावजन्यत्वं प्रतिबध्यत्वं यथा दाहादिकं प्रति मण्याद्यभावस्य कारणत्वात् मण्या
दौ दाहादिप्रतिबंधकत्वं दाहादौ मण्यादिप्रतिबध्यत्वं च वस्तुतः साक्षात्संबंधत्वस्यानुभवसिद्धतया अनयोरप्यतिरिक्तप
दार्थत्वं प्रामाणिकं एवं स्वत्वावधित्वादीनामप्यनुसंधेयमिति सारमिति संक्षेपः ॥ इति प्रतिबध्यत्वप्रतिबंधकत्वादीनि ॥ इति
परिभाषाविशेषः संपूर्णम् सं० १९०१